M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 246

Title : Pratishtha Vidhi

246

~~वारुणी~~ प्रतिष्ठा विधि from प्रतिष्ठा तिलक।

२४

~~Varuni Pratishtha~~ from Pratishtha Tilaka	:	Title
	:	Author
	:	Editor
Sam. 1771	:	Year, Vols.
	:	Publisher
246	:	Remarks

॥ नमः श्रीगणेशाय॥ यजुर्वेदाय नमः॥ ॥अथ वापीकूपतडागादिषु सूत्रोक्तेन वैदिके
न प्रतिष्ठा। लिंगोक्तेन विधिना वारुणीप्रतिष्ठानुक्रमणिका। तत्र उत्तरायणे। शुक्लपक्षे
ज्योतिर्विदुक्तपुण्यदिनतिथिवारनक्षत्रेषु सर्वदा ऋतुश्चापि कार्याः। वारुणीप्रतिष्ठाफल
माह। प्रतिकर्तव्या शुभे लग्ने शुभे दिने। आदौ वर्षासु शरदि हेमंते शिशिरे अथवा। वसंते वा निदाघे
वा प्रतिष्ठा वारुणी मता॥१॥ प्रतिष्ठा वारुणी मंत्रैः शरद्वर्षासु वाञ्छया। हेमंते शिशिरे वाथ
बहुपुत्रा मदा धना। निदाघे वा वसंते वाथ तथा स्यात्सुसंपदः। अश्वमेधेन यत्पुण्यं ग्रीष्मे व
र्षासु तद्भवेत्॥२॥ गोमेधेन समं प्रोक्तं शरत्काले वसंतयोः। शिशिरे च। वरे हेमंते सर्वयज्ञफ
लं लभेत्॥३॥ अथ प्रतिष्ठाख्याने पश्चिमदिशि दशहस्तसममंतात्। अथवा द्वादशहस्तसम
मंतात्। अथवा षोडशहस्तसममंतात्। चतुर्द्वारं समसूत्रं त्रिपुटितं समंडपं स्नानस्थलैः कुंडा
श्रागार स्तम्भोदुंबराश्वत्थन्यग्रोधपलाशवल्कलतोरणलसद्वारशाखं। पीतरक्तकृष्ण
धूम्रमौक्तिकचित्रप्रवाल। श्वेतरक्त। गौरध्वजपताकादिभिः सर्वादिं दशदिक्षु शोभि
तं मंडपं कृत्वा। तन्मध्ये नैऋत्ये नागेश सर्ववास्तुपूजनं। हेता वेदिका सर्वतो हस्तद्वयप्रमा
ण चतुरस्रोच्छ्रिता कार्या। ततश्चतुर्हस्ता एकहस्तोच्छ्रिता। मंडपमध्यप्रदेशे वारुणमंडले १

हस्तेषु सर्वतोभद्रं यद्वा। अपक्वेष्टिकाभिर्वेदिका कार्या। ततो मंडले सर्वतोभद्रे सन्नयेत्सर्व
देवताः। ततो मंडलात् सर्वईशान्यां च मंडलात् सर्वतः कुंडं। चतुरस्रं त्रिमेखलं। एकमेखलं वा
कर्तव्यं। लघुकर्मणि। ततो वेदीं। अधः परितो धवलयित्वा। मंडपसंमार्जनं। सर्वत्र गोम
येनोपलेपयेत्। अथ प्रतिद्वारं कलशद्वयं। वारुणमंडले मध्ये प्रतिकोणं कलशमेकै
कं। ग्रहपीठेशान्यां एकं रुद्रकलशं। सर्वान् प्रक्षाल्य जलसंपूर्णान् सर्वौषधितीर्थोदक
पंचस्नानमृदाभ्यां गोरोचनसिद्धार्थगुग्गुलचंदनयुतान् मुद्रापञ्चरत्नसर्वशरावयु
तान्। सपल्लवान् सवस्त्रान् सनालिकेरान् पुष्पमालावेष्टितान् कृत्वा। वास्तुवेद्यां अखंडि
तपदे शुक्लवर्णैः तंडुलैर्वास्तुं मंडयेत्। कूपवास्तु वर्तुलाकृतिः। विंबे नास्करसाजिते इति
आगमोक्तं कृत्वा। यथाशास्त्रनिर्दिष्टं वास्तुं कृत्वा। तन्मध्ये वेद्यां अखंडितपदे वारुणमं
डलं सर्वतोभद्रं वा। रक्तशुक्लतंडुलमारभ्य मुख्यणकदालिभिः रचयित्वा। तन्मध्ये कलशा
स्य विनायकब्रह्मविष्णुरुद्राणां वरुणस्य च। सौवर्णीं प्रतिमां संस्थाप्य। कृत्वा तु हैमं तु कू
र्मं चैव मत्स्यं वै रूप्यसंनवं। डुडुराश्च तथा ताम्रा मकराः शीससंनवाः। अन्येषां जलजीवानां
मौक्तिकानि प्रकल्पयेत्। रौप्यमया जलमानरः। मकरी ग्राहिणी कौडीकच्छपी सर्पिणी तथा

ज्वलौकाउर्ईशीचैवसमेताजलमातरः॥२॥स्थाप्याः॥सर्वसंभारान्समीपस्थान्कृत्वा।ततो
यजमानःसपत्नीकःकृतस्नानःशुक्लमाल्यांबरधरःशुक्लगंधानुलेपनः।गृहेकूपेप्रतिष्ठानि
मित्तंसर्वमातृस्थापनं।नांदीमुखंश्राद्धंकृत्वा।पश्चान्मंडपेसमागतव्यं।यजमानोवेदध्वनि
नामंडपंप्रविशेत्।पश्चिमद्वारेण।कृतस्नानाआचार्यऋत्विजश्च।शुचास्वस्तत्राष्टौहोतारः।
द्वारपालास्तथाष्टवै।अष्टौजापकाःकार्याआचार्यस्तथैकतः।१एवंपंचविंशतिः।२५॥सर्वे
षांब्राह्मणानांअर्घपात्रेऽर्घंनिवेद्य।अनुक्रमेणचरणान्प्रक्षालयेत्।ततोवरुणश्राद्धंकृत्वा
वरयेत्।अद्यगृहस्यवाजलाशयस्यप्रतिष्ठारंभनिमित्तंऋत्विक्वरणंकरिष्ये।आसनंदद्या
त्।अमुकसगोत्रंअमुकप्रवरंअमुकवेदाध्यायिनंअमुकशाखिनंआचार्यत्वेप्रतिष्ठाक
र्तुंत्वामहंवृणे।एवंब्रह्माचार्यऋत्विजःजापकद्वारपालाश्च।ततःसर्वेषांगंधपुष्पधूपदीपव
स्त्रमुद्रिकाकुंडलतांबूलैःपूजनं।सर्वत्रवास्तुवरुणौप्रीयेतामितिवाच्यं।दीपपूजा।आच
मनं।भोजनसंकल्पः।सुप्रोक्षितादिकरणं।पुनःप्रच्छातिलकं।आशीर्वादः।वर्धापनी।आ
चमनं।पुण्याहवाचनं।ततआचार्यआचम्य।प्राणायामंकृत्वा।अद्याहेतुवार्यप्रतिष्ठांकरि
ष्ये।इतिसंकल्पः।सितसर्षपान्नीत्वा।देवाआयांतु।यातुधानाअपयांतु।वरुणदेवतायजमा २

नरक्षा।इतिसर्षपान्विकीर्यरक्षांकृत्वा।आपोहिष्ठेतिकुशोदकेन।यागभूमिमभ्युक्ष्य॥
प्रार्थना।स्वागतंदेवदेवेशविश्वरूपनमोस्तुते।शुद्धेस्मिन्पिचस्थानेशुद्धिकर्मःसहस्रता।१।मि
त्रमित्रोसिदेवानांधनदोधनकांक्षिणां।अविद्यारोगभूतानांलकस्मशत्रुशारणार्थिनां।२वेदो
क्तेनविधानेनप्रतिष्ठांसमस्पृहतां।इतितन्मयोभूत्वा।अस्ययागस्येत्यादि।वास्तुदेवीसमी
पेस्थंडिलंकृत्वा।तत्राग्निमुपसमाधाय।वास्तुदेवतानिमित्तंचरुमारोपयेत्।कुंडेग्निमुप
समाधाय।प्रथमंवारुणचरुयवमयः।ततोनवग्रहचरुः।एवंचरुद्वयं।वास्तुदेवतास्थाप
नं।ततोवरुणदेवताग्रहान्स्थापयेत्।आर्शितान्गृहीत्वाप्रतिष्ठामंत्रैश्चतुर्दिक्षुतोरण
पताकाध्वजंकृतोमंडपोवास्तुदेवतामंडलेमंडपस्थापितदिनायकप्रमुखसमस्तदेवताग्रहाःस्था
पितदेवतासहिताजलमातरश्चरूपप्रतिष्ठानिमित्तंसुप्रतिष्ठाभवंतु।एवंसर्वत्रप्रतिष्ठाकार्या।
ततोद्वारपालान्चतुर्दिनियोजयेत्।समर्यान्यथामध्येकोपिनप्रविशति।ततोजापकाश्चियो
जयेत्।बह्वृचोसर्वतःस्थाप्यो।दक्षिणेनयजुर्विदोसामगोपश्चिमेस्थाप्योउत्तरस्यामथर्वणो॥
रात्रिसूक्तंचरौद्रंचपावमानंसुमंगलं।जपेरन्पौरुषंसूक्तंसर्वतोबह्वृचःपृथक्।१।शाक्तंरौद्रं
चसौम्यंचकूष्मांडंजातवेदसं।सौरंसूक्तंजपेत्तस्तुदक्षिणेनयजुर्विदो॥२॥वैराजंपौरुषंसूक्तं
सौवर्णंरुद्रसंहितां।शौं॰शिवपचनिधनंगायत्रंज्येष्ठसामगं।वामदेव्यंबृहत्साममरौरवंचरथ

नरांव।गवाहनंचविष्णुं रक्षोघ्नंवापरंनया।गायंतीसामगाविप्राः पश्चिमद्वारमाश्रिताः॥४॥
अथर्ववेदस्त्वोत्तरतः शांतिकं पौष्टिकं जपेत्।वेदीषु कोणकलशेषु वारुणं सूक्तं जपेत्।इमं
मेगंगेपंचनद्यः सर्वतीर्थानि सूक्तानि।इमं मे गंगे विंशति विस्मुसहिता।रुद्रेण विंशतिः प्रोक्ता वे
दादष्टविरेवच।समुद्रज्येष्ठेत्रिषष्ठच जपं निष्टत्य॥सर्वमंडपतोरणदेवतापूजनं।बलिदानं मंड
पं परितः सूत्रेण वेष्टयेत्।सर्वत्रभूमिसन्नर्त्ताः भूमिरगमान्।मातामानरमिष्टगात्।त्यामपुत्रैः प
शुभिः पौत्रैः देष्टिभिनियान्।इति भूमिसन्नर्त्ताः।अथ तोरणसन्नर्त्ताः।पूर्वस्यां दिशियज्ञस्य सुप्रभस्त्वा
तोरणं।महावीर्यं महाकायं सुवर्णं मदत्राप्रनं।अत्र द्वारि स्थितं शैलं माल्यवंतंचपर्वतं।एह्येहि
त्वंसत्ययुगद्वारेमहातोरणस्त्वां दिशं सुप्रभं नाम तौ यज्ञस्य गृहे रक्षेति विघ्नं।अग्निमीलेति मंत्रेण
आवाहनं। सर्वतोरणं॥१॥दक्षिणस्यां दिशियज्ञस्य भीमाख्यं तोरणं।महावीर्यंमहाकायं शीत्रां
ननसमप्रभं।तत्र द्वारे स्थितं शैलं विंध्यनामैकपर्वतं।१।एह्येहि त्वं त्रेतायुगद्वारे महातोरण त्वां
दिशं भीमनामयज्ञस्य गृहे रक्षेति विघ्नं।इषेत्वेति मंत्रेणावाहनं।इति दक्षिणतोरणं॥पश्चिमस्यां
यां दिशमाश्रित्य [illegible] नामन्यज्ञगृहे रक्षेति विघ्नं।३।अग्नआयाहीति मंत्रेणावाहनं इति प्रत्य
क्तोरणं।उत्तरस्यां दिशियज्ञस्य विकटं नाम तोरणं।महावीर्यं महाकायं शुद्धस्फटिकसन्नि २
भं।तत्र द्वारे स्थितं शैलं हिमवंतंचपर्वतं॥एह्येहि त्वं कलियुगद्वारे महातोरण त्वां रक्षौ दिशं क्कि

टं नाम नयज्ञगृहे रक्षेति विघ्नं॥४॥शंनो देवीति मंत्रेण आवाहनं।इति उत्तरतोरणं।वितानं सर्वतो
द्वारं दक्षिणं पुष्पकं नवेत।पश्चिमं नु यनं नाम कामदं चोत्तरं स्मृतं।१॥एह्येहि वितान सर्वद्वार यज्ञ
गृहे रक्षेति विघ्नं॥१॥एह्येहि पुष्पकं दक्षिणद्वार यज्ञगृहे रक्षेति विघ्नं॥२॥एह्येहि विप्रमत्रामपश्चिम
द्वारं यज्ञगृहे रक्षेति विघ्नं॥३॥एह्येहि कामद उत्तरद्वार यज्ञगृहे रक्षेति विघ्नं॥४॥एवं सर्वत्र॥एवं
सर्वत्र।कुंकुम पुष्पधूपबलिदानोपहारान् समर्प्य तोरणदेवताः पूजयित्वा॥अत्र चंदनादिकुंकुम
पुष्पधूपबलीन् ददामि।सुप्रभास्त्याय ऋग्वेदमूर्तये इंद्रदेवत्याय माल्यवत्पर्वतसहिताय विता
ननाम सर्वद्वारसहिताय द्वारपालसहिताय सुप्रभनाम्ने प्लक्ष तोरणाय नमः॥१॥अत्र चंदनादिकुं
कुमपुष्पधूपबलीन् ददामि।सुशोभनाय यजुर्वेदमूर्त्तये यमदैवत्याय विंध्यपर्वतसहिताय
पुष्पकनापुष्पकनाम दक्षिणद्वारसमाश्रिताय द्वारपालसहिताय भीमनाम्ने उदंबरतोरणाय
नमः॥२॥अत्र चंदनादिबलिदानं च॥ सुधर्माय सामवेदमूर्त्तये वरुणदैवत्याय गंधमादनपर्वतस
हिताय यननाम पश्चिमद्वारमाश्रिताय द्वारपालसहिताय [illegible] नाम्ने अश्वत्थतोरणाय नमः
३॥अत्र चंदनादिबलिदानंच।सुहोत्राय अथर्ववेदसहिताय सोमदैवत्याय हिमाचलपर्वतस
हिताय कामसहिताय उत्तरद्वारमाश्रिताय द्वारपालसहिताय विकटनाम्ने न्यग्रोधतोरणाय नमः।
४॥वंशेषु किंकराः प्रोक्ताः स्तंभेषु सर्वदेवताः।पट्टेषु पन्नगाः सर्वे क्षेत्रपालमथस्तथा॥१॥अत्र चंदना

।बलिदानंच।मंडपषोडशस्तंभेषु।आद्यस्तंभे ब्रह्मा।१द्वितीये विष्णुः।२तृतीये शिवः।३।चतुर्थे इंद्रः।४पंच
मे भास्करः।५षष्टे विनायकः।६सप्तमे यमः।७।अष्टमे सर्पाः।८नवमे अश्विनौ।९दशमे मरुतः।१०ए
दशो मार्कंडेयः।११द्वादशे वायुः।१२त्रयोदशे वसवः।१३चतुर्दशे बलिदेहाः।१४।पंचदशे बृह
स्पतिः।१५।षोडशे विश्वकर्मा।१६।इति स्तंभानां देवताः।।सर्वेभ्यो देवेभ्यो नमः।वंशेषु किंनरेभ्यो
नमः।मंडपपृष्ठे अत्र चंदनादिबलिदानंच।।सर्वेभ्यः पन्नगेभ्यो नमः।मंडपस्याधे अत्र चंदनादि
च।क्षेत्रपालेभ्यो नमः।ततो ध्वजस्थापनं।कुमुदः कुमुदाक्षश्च पुंडरीकोथ वामनः।शंकुकर्णः सर्व
नेत्रः सुमुखः सुप्रतिष्ठितः।१ब्रह्मानागादिसर्वादिदशोनेध्वजनामकाः।।अत्रचंदनादिबलिदानं
च।कुमुदाक्षसहितायाग्निकोणसमाश्रिताय नमः।१अत्रचंदनादि०पुंडरीकसहितायदक्षि
णध्वजायनमः।अत्रचंदनादि०।वामनसहितायनैऋत्यकोणसमाश्रितायदक्षिणध्वजायनमः।
अत्रचं०।शंकुकर्णसहितायपश्चिमध्वजायनमः।५।अत्रचंद०।सर्वनेत्रसहितायवायुकोणसमा
श्रितायध्वजायनमः।।अत्र०।सुमुखसहितायउत्तरध्वजायनमः।७।अत्रचं०।सुप्रतिष्ठितसहितायेशा
नकोणसमाश्रितायध्वजायनमः।८।।ब्रह्मसहितायाधिकसहितायध्वजायनमः।।९।।अत्रचं०।ना
गसहितायाधोलोकसमाश्रितायध्वजायनमः।१०।अत्रचं०।।अथबहुमंडपरितोगणेशादौदिक्पालस्था ४
पनं।बलिदानंच।अथदिक्पालस्थापनं।गणेशादि०।ॐनमोभगवतेगणपतयेएकदंष्ट्रायलंबोदर

गजवदनपरशुहस्तायउन्मत्तप्रलंबसुरासुरवंदितायजगत्सर्वाधिपतयेसर्वविघ्ननाशनायमोद
कप्रियायाखुरूढाय।।एह्येहिभगवन्गणनाथत्वंसिद्धिबुद्धिप्रदायक।परिवारसहितप्रभो।सु
यत्तनागंप्रतीछस्वस्रजांचैवनमोनमः।१।मंडपेऽस्मिन्प्रवस्याभिमयाभक्त्यानिवेदितं।इदमर्घ्यमि
दंपाद्यंधूपोयंप्रतिगृह्यतां।।२गणानांत्वाऋक्।गणानांत्वायजुः।गणपतिसमा०गणनाथोग
र्णिनांश्रोयंतमथर्वणे।इत्यादिगणपतयेबलिं।भगवन्गणपतये।आखुस्कंधसमारूढायपरशुह
स्तायसिद्धिबुद्धिप्रियायाद्दहार्दधारकस्वस्यांदिशिदिव्यमातृयोगिनीक्षेत्रपालायसपरिवारा
प।यस्तुभ्योपराधेश्चमधुपर्कहविस्त्रया।स्वस्यानरक्षणार्थायअछिद्रीरक्षणायच।स्वदिग्भागे
ल्पाम्येयंयावधनःसमाप्यते।भगवतेगणपतयेसपरिवाराय।अनेनबलिकरणेनावि
धिनाप्रियतां।अत्रचंदनादिबलिदानंच।ॐनमोभगवतेशक्रायसहस्रनेत्रायऐरावतगजे
ष्ठायधिरूढायअमितबलपराक्रमायनानारत्नविचित्रोज्वलकिरीटधारिणेगीर्वाणायसुरमौलि
माणिक्यलुंठितचरणायशातक्रतो।एह्येहिभगवन्देवराजेंद्रपौलोम्यासहितप्रभो।यत्तनागंप्रती
छस्वस्रजांचैवनमोनमः।१।त्रातारमिंद्रऋक्।मरुत्वा।२।इंद्रयजुः।त्रातारमिंद्रसामा।इंद्रमिंद्रमथ
र्वणे।भगवतेइंद्रायऐरावतस्कंधसमारूढायवज्रहस्तायइंद्राणीप्रियायदेहार्दधारकस्वस्यां
पूर्वस्यांदिशिसपरिवाराय।यावत्सौभ्योपराधेश्चमधुपर्कहविस्त्रया।स्वस्यानरक्षणार्थायअछि

डीकरणायच।स्वदिग्नागेत्वयास्थेयंयावद्यज्ञःसमाप्यते॥१भगवतेशक्रायसपरिवारायअनेनब
लिकरणसंज्ञाविधिनाप्रीयतां॥२अत्रचंदनादिबलिदानंच॥ॐनमोभगवतेअग्नयेसर्वभक्षाय
स्रुक्स्रुवकमंडलुकृतपोपवीताजिनधारिणेचंचुज्वालानिशितशरीरप्रलंबकूर्चोपशोभिताय
वरमेषवाहनाय।एह्येहिभगवन्हव्यवाहस्वाहयासहितप्रभो।आग्नेय्यांदिशिसंस्थितभो।यज्ञ
भागंप्रतीच्छस्वसज्जांचैवनमोनमः॥२अग्नआयाहि।ऋक्।अग्निर्दूतंयजुः।अग्निंवोवावृधिसाम॥
अग्निरग्निर्यद्वर्णे।योनौतिष्ठतिमंत्रेणबलिमग्नेःप्रदापयेत्॥भगवतेअग्नयेमेषस्कंधसमारू
ढायस्रुवहस्तायस्वाहाप्रियायदेहार्धधारकस्त्वस्यांआग्नेय्यांदिशिसपरिवाराय।यावत्तोष्योपरा
धेश्चमधुपर्कहविस्त्वया।स्वस्थानरक्षणार्थायअच्छिद्रीकरणायच।स्वदिग्नागेत्वयास्थेयंयाव
द्यज्ञःसमाप्यते॥१॥भगवतेसपरिवारायअग्नयेबलिकरणसंज्ञाविधिःप्रीयतां॥२अत्रचंदनादिब
लिदानंच॥ॐनमोभगवतेयमायदंडपाशहस्तायप्रचंडमहिषवाहनायभिन्नांजनपुंजवर्णाय
प्रलंबबाहूग्रामदमनायरक्तलोचनायएह्येहिभगवन्धर्मराजत्वंकालरात्रिप्रियार्धधारकस्त्वस्यांद
क्षिणस्यांदिशिसपरिवाराय।यावत्तोष्योपराधेश्चमधुपर्कहविस्त्वया।स्वस्थानरक्षणार्थायअच्छिद्री
करणायच।स्वदिग्नागेत्वयास्थेययावद्यज्ञःसमाप्यते॥१॥भगवतेयमायसपरिवारायबलिकरण ५
संज्ञाविधिःप्रीयतां।अत्रचंदनादिबलिदानंच॥ॐनमोभगवतेनैर्ऋतयेप्रेताधिपतयेखड्गहस्तायनील

वाहनविकटरूक्षमनटाजूटमंडितगंधरायविकटदंष्ट्राकरालाय।एह्येहिभगवन्रक्षाधिपतेउच्छि
ष्टासहितप्रभो।नैर्ऋत्यांदिशिसंस्थितपरिवारैःसहप्रभो।यज्ञभागंप्रतीच्छस्वसज्जांचैवनमोनमः
।वेधाहिनिर्ऋतिनांकः।ऋक्।नमःसुतेनैर्ऋतेयजुः।वहहिनिर्ऋतिनांसाम।यंतेदेवीनिर्ऋतिनाम
यवर्णे।अथातोनिर्ऋतिर्यंहरिस्यदद्याद्देनिर्ऋतेर्बलिं।भगवतेनिर्ऋतयेशवस्कंधसमारूढा
यखड्गहस्तायउच्छिष्टाप्रियादेहार्धधारकस्त्वस्यांनैर्ऋत्यांदिशिसपरिवाराय।यावत्तोष्योपराधे
श्चमधुपर्कहविस्त्वया।स्वस्थानरक्षणार्थायअच्छिद्रीकरणायच।स्वदिग्नागेत्वयास्थेयंयावद्यज्ञः
समाप्यते।भगवतेनिर्ऋतयेसपरिवारायबलिकरणसंज्ञाविधिःप्रीयतां॥ ॥अत्रचंदनादिबलि
दानंच॥ॐनमोभगवतेवरुणायपाशहस्तायविचित्रमाणिक्यमालालंकृतशरीरायसकलनिम्न
गाधिपयेवरुणमकरारूढाय।एह्येहिभगवन्जलनाथत्वंआकादिनीसहप्रभो।पश्चिमस्यांदि
शिसंस्थितपरिवारैःसहप्रभोयज्ञभागंप्रतीच्छस्वसज्जांचैवनमोनमः॥वरुणंवोरिशादसंऋक्।व
रुणस्योत्तंभननयजुः।मित्राप्रहाउसाम।वरुणोवायवंति।यद्वर्णो।किंदेवतोस्यात्प्रतीच्यांदिशिबलिं
वरुणायदापयेत्।भगवतेवरुणायपाशहस्तायमकरस्कंधसमारूढायआकादिनीप्रियादेहा
र्धधारकस्त्वस्यांपश्चिमस्यांदिशिसपरिवाराय।यावत्तोष्योपराधेश्चमधुपर्कहविस्त्वया।स्वस्थान
रक्षणार्थायअच्छिद्रीकरणायच।स्वदिग्नागेत्वयास्थेयंयावद्यज्ञःसमाप्यते।भगवतेवरुणायसपरि

वारायबलिकरणसंज्ञाविधिःप्रियतां।अत्रचंदनादिबलिदानंच॥ॐनमोभगवतेवातायसमस्तभुव
प्राणात्मकायसकलसारंगमृगाधिरूढाययत्पटप्रवीनपयोहारावलीविडस्तसमस्तदिग्वायकवं
धुविलोकनाय।एह्येहिभगवन्वायुदेवत्वंचंचलासहितप्रभो।सर्वत्रावस्थितःप्रभो।यत्नागंप्रती
छस्वसंज्ञांचैवनमोनमः।आवायोभूषचित्रपा।इंद्रवायुइमेसुताऊक्।वातोवामनोवायजुः।वातोऽप
वनोसाम।वायोसविनुअथर्वणे।योवायुनिष्ठेतिमंत्रेणबलिंदद्यात्तुवायवे।भगवतेवातायमृगस्कंध
समारूढायध्वजहस्तायचंचलाप्रियार्द्धदेहार्द्धधारकस्वस्यांवायव्यांदिशिसपरिवाराय।यावत्तोष्योप
राधैश्चमधुपर्कहविस्तया।स्वस्थानरक्षणार्थायच्छिद्रीकरणायच।स्वदिग्भागेलयास्येयंयावद्यज्ञःसमा
प्यते।१भगवतेवातायसपरिवारायबलिकरणसंज्ञाविधिःप्रीयतां।अत्रचंदनादिबलिदानंच।ॐनम
मोभगवतेकुवेरायनरवाहनायनिधानेनपुष्पेणसपरिवारायवामकरकमलविनिहितनकुल
कायरत्नौरीबकीसज्जस्रकक्रंधरायालकापुरीनाथाय।एह्येहिभगवन्वित्तनाथत्वंआक्रादिनी
सहितप्रभो।उत्तरस्यांदिशिसंस्थपरिवारैःसहप्रभो।यत्नागंप्रतीछस्वसंज्ञांचैवनमोनमः।ऽइवि
दाऊक्।सोमोधेनुयजुः।सोमसाम।सबोधिसूरीमघवाअथर्वणे।देवस्यउदीच्यांदिशिबलिंसो
मायदापयेत्।भगवतेकुवेरायबीजसरकहस्तायआक्रादिनीप्रियादेहार्द्धधारकस्वस्यांदि ६
शिसपरिवाराय।यावत्तुष्योपराधैश्चमधुपर्कहविस्तया।स्वस्थानरक्षणार्थायच्छिद्रीकरण

यच।स्वदिग्भागेलयास्येयंयावद्यज्ञःसमाप्यते।२भगवतेकुवेरायसपरिवारायबलिकरणसंज्ञा
विधिःप्रीयतां।अत्रचंदनादिबलिदानंच।ॐनमोभगवतेईशानायदेवाधिदेवायत्रिपुरांत
कायविकटजटाजूटमंडितायवृषभारूढाय।उमादेहार्द्धधारिणे।एह्येहिभगवन्रुद्रउ
मयासहितप्रभो।ईशान्यांदिशिसंस्थितपरिवारैःसहप्रभो।यत्नागंप्रतीछस्वसंज्ञांचै
वनमोनमः।कद्रुकायप्रचेतसेऊक्।यन्कामनोयजुः।ईशानईसाम।ईशानीत्वामथर्वणे॥
सप्तद्वीपनिदीमानसीमिनज्ञाबलिंदद्यात्।भगवतेईशानायवृषभस्कंधसमारूढाय
त्रिशूलसहस्तायउमादेहार्द्धधारकस्वस्यांदिशिईशान्यांसपरिवाराय।यावत्तोष्योपरा
धैश्चमधुपर्कहविस्तया।स्वस्थानरक्षणार्थायच्छिद्रीकरणायच।स्वदिग्भागेलयास्येयं
यावद्यज्ञःसमाप्यते।२भगवतेईशानायसपरिवारायबलिकरणसंज्ञाविधिःप्रीयतां॥
अत्रचंदनादिबलिदानंच।ॐनमोभगवतेब्रह्मणेचतुर्मुखायसकलविद्याधिपतयेशिर
सिकिरणनिर्मलवरहंसगामिने।एह्येहिभगवन्ब्रह्मन्ब्रह्माणासहितप्रभो।त्रैलोक्यो
त्पत्तिकारकःपरिवारैःसहप्रभो।यत्नागंप्रतीछस्वसंज्ञांचैवनमोनमः।नमोब्रह्मसेऊक्।
ब्रह्मयज्ञानंयजुः।ब्रह्मसाम।अम्मशीर्षमथर्वणे।अथाब्रह्मनब्राह्मणस्तयादद्यात्ब्रह्मणेबलिं
भगवतेब्रह्मणेहंसस्कंधसमारूढायस्रुकहस्तायसावित्रीप्रियादेहार्द्धधारकस्वस्यांऊर्द्धदिशि

सपरिवाराय।यावत्तुष्टोपहारैश्चमधुपर्कहविस्तथा।स्वस्थानरक्षणार्थायच्छिद्रीकरणायच।स्व
दिशागेत्वयास्थेयंयावद्यज्ञःसमाप्यते।२भगवतेब्रह्मणेचतुर्मुखायसपरिवारायबलिकरणस्वा
विधिःक्रीयतां।अत्रचंदनादिबलिदानंच।३ॐनमोभगवतेऽनंतायकद्रूप्रथमपुत्रायसहस्रफणाव
तीकर्षनाथायक्षीरोदधिशयननिलयाय।एह्येहिभगवन्नागराजत्वंधरणीधरणक्षमः।परि
वारैःसहस्रजो।आत्मनागंप्रतीक्षस्वपूजांचैवनमोनमः।क्षेत्रसमृतेनाऋक्।विश्वतश्चक्षुरुतयनु
सर्पसामं।सर्पसूक्तमथर्वणे।भगवतेऽनंतायकद्रूप्रथमपुत्रायस्वस्यामधोदिशिसपरिवाराय
यावत्तौष्टोपहारैश्चमधुपर्कहविस्तथा।स्वस्थानरक्षणार्थायच्छिद्रीकरणायच।स्वदिशा
गेत्वयास्थेयंयावद्यज्ञःसमाप्यते।भगवतेऽनंतायसपरिवारायबलिकरणस्वाविधिःक्री
यतां।१०दिक्पालपूजनंसमाप्त।अत्रचंदनादिबलिदानंच।ऊर्ध्वमावाहयिष्यामिविमानंचैवमं
डितं।सप्तज्योतिमरुद्भ्यांग्रहनक्षत्रमालिनां।यज्ञभागंप्रतीक्षस्वपूजांचैवनमोनमः।अगनि
खननाऋक्।अत्रचंदनादिबलिदानंच।ध्रुवमावाहयिष्यामिसर्वग्रहगणेश्वरं।चक्रंचचामि
तयेननविधेनस्तुविर्यथा।यज्ञभागंप्रतीक्षस्वपूजांचैवनमोनमः।ध्रुवोसीतिध्रुवंयजुः।अत्र
चंदनादिबलिदानंच।सप्तर्षीनावाहयिष्यामि।ऋषयोगौतमभरद्वाजविश्वामित्रजमदग्निव ७
सिष्टकश्यपाऋषयः।यज्ञभागंप्रतीक्षस्वपूजांचैवनमोनमः।सप्तऋषयःसाम।अत्रचंदनादिबलि

दानंच।मातृनावाहयिष्यामिसर्वविघ्नविनाशनीं।सर्वपापहरीदेवीर्दैत्यदानवनाशनीः।यज्ञ
भागंप्रतीक्षस्वपूजांचैवनमोनमः।जातवेदसे।अथर्वणे।राजन्मिप्राचीदिक्।४॥इतिदिक्पाल
पूजनं॥ ॥बलिंशृण्वंतुमेदेवाःआदित्यावसवस्तथा।मरुतोथाश्विनौरुद्राःसुपर्णाःपन्नगा
गृहाः।१असुरायातुधानाश्चसुरूपस्थानाश्चदेवताः।डाकिन्योयक्षवैतालायोगिन्यःपूतना
:शिवाः।२जृंभिकाःसिद्धगंधर्वामालाविद्याधरानगाः।दिक्पालालोकपालाश्चयेचविघ्नविना
यकाः।३।जगतांहितकर्त्तारोब्रह्माद्याश्चमहर्षयः।माविघ्नोमाचमेपापंमासंतुपरिपंथिनः।४
सौम्याभवंतुतृप्ताश्चभूतप्रेतसुखावहाः॥इतिबलिदानं॥ ॥अथवास्तुपूजनं॥दशास्र्वांजलता
रेखादशचैवोत्तरायता।सर्ववास्तुविधानेनदशैवानवकंनव॥१॥मध्येनवपदोब्रह्माचत्वारोदि
क्षुपट्पदाः।विदिक्षुद्विपदाचाष्टौद्वात्रिंशास्तरिकाबहिः।२वास्तुरूपहरंस्मात्तत्स्वेस्वेपदेदेवताः
स्म्याः।ईशानकोणादारभ्यसार्द्धपदईशानायनमः।पर्जन्यायनमः।जयंतायनमः।माहेंद्रं।सूर्यं
सत्यं।भृशं।एवंषट्पृथक्।पदस्थ्यःसार्द्धपदे।अंतरिक्षं।तस्मीपसार्द्धपदेपुभृंगं।पुनःसार्द्धपिपूर्न्
दौवारिकं।सुग्रीवं।पुष्पदंतं।वरुणं।असुरं।शोषं।एवंषट्पृथक्।२।षट्पदेपुनः।सार्द्धपदे।रोगं।
तस्मीपेसार्द्धपदेवायुं।नागं।मुख्यं।भल्लाटं।सोमं।गिरं।अदितिः।एवंषट्।प्र०२।अथषोडशपदेषु॥

चतुर्दशाग्निरेकेकः। मरीचिं। विवस्वंतं। धराधरं। एवं अथ यावत स्तूपमार्द्धमार्द्धपदसमीपे यानि यानि चला
रिपदानि। पदद्वये आपं। पदद्वये आपवत्सं। वह्निकोणे पदद्वये सवित्रे। पदद्वये सावित्रं। पापराक्षसे।
एतासु च नस्तूपस्ज्जों कृत्वा। अथ स्वगृह्योक्तविधानेन प्रथमं वास्तुहोमं कुर्यात्। पर्युक्षणांते आज्याहु
तीर्जुहोति। इह रतिरिह रमध्वमिह धृतिरिह स्वधृतिः स्वाहा। इदमग्नये। उपसृजं धरुणं मात्रे धरुणो
मातरं धयन् रायस्पोषमस्मासु दीधरत् स्वाहा। इदमग्नये। अपरास्वतस्र आहुतयः। वास्तोष्पते प्रति
जानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः। यत्त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे स्वाहा
। इदं वास्तोःपतये। वास्तोःपते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिंदो। अजरासस्ते सख्ये
स्याम पितेव पुत्रान् प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे स्वाहा। इदं वास्तोःपतये।२। वास्तोः
पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या। पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभि
ः सदा नः स्वाहा। इदं वास्तोःपतये।३। अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन्। सखा सुशे
व एधि नः स्वाहा। इदं वास्तोष्पतये।४। आघारावाज्यभागौ कृत्वा। स्थालीपाकेन षडाहुतयः। अ ८
ग्निमिंद्रं बृहस्पतिं विश्वान्देवानुपह्वये सरस्वतीं च वाजिनीं च वास्तु मे दत्त वाजिनः स्वाहा। इदम
ग्नये। इंद्राय बृहस्पतये। विश्वेभ्यो देवेभ्यः उपह्वये सरस्वत्यै वाजिन्यै स्वाहा। सर्पदेवजनान्सर्वान्हि

मवंतं सुदर्शनं। वसूंश्च रुद्रानादित्यानीशानं जगदैः सह। एतान्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः।
स्वाहा। इदं सर्पदेवजनेभ्यो हिमवते सुदर्शनाय वसुभ्यो रुद्रेभ्य आदित्येभ्य ईशानाय जगदेभ्यश्च।२। स
र्वाह्णाय सपराह्णं चोभौ मध्यंदिना सह। प्रदोषमर्धरात्रं च व्युष्टां देवीं महापथां। एतान्सर्वान्०। इदं
सर्वाह्णाय चोभौ मध्यंदिना सहाय प्रदोषमर्धरात्रव्युष्टायै देव्यै महापथायै च। कर्तारं च विकर्ता
रं विश्वकर्माणमोषधीश्च वनस्पतीश्च।४। धातारं च विधातारं। एतान्०।। इदं कर्त्रे विकर्त्रे विश्व
कर्मणे ओषधिभ्यो वनस्पतीभ्यश्च।।४।। धातारं च विधातारं निधीनां च पतिं सह। एतान्०।। इदं धात्रे वि
धात्रे निधीनां पतये।।५।। स्योनं शिवमिदं वास्तु दत्तं ब्रह्मप्रजापतिं सर्वाश्च देवताः स्वाहा।। इदं ब्रह्म
णे प्रजापतये सर्वेभ्यो देवेभ्यश्च।६। अथानंतरं स्विष्टकृत्। नवाहुतयः। षट्कुंडे होमो भवति।।
ततः शेषचरुं हरिद्रामिश्रं बलिं रिक्तमैरित्यादि दद्यात्। समस्तदेवतानां प्रत्येकं। चंदनं च पुष्पं। धूपं
दीपं। पत्रं स्रगां। ज्ञात्वा। उत्तरीदानं। ब्राह्मणे नालिकेरं। वास्तोष्पते इति मंत्रेण। ततो वास्तोष्पते गृहे स्थ
ण्डिले मुख्यकुंडे वा। यवतिलसमिद्पायसचरुभिर्वास्तोष्पते प्रतिजानीत्यं च कृत्वा। चरुशेषं वहिः को
णेषु। वास्तुमर्जां समाप्य। आचार्याय धेनुं कांचनं दद्यात्। ततो होमार्थं कुलिशो नियोजयेत्। अ
थानंतरं सर्वमुख्यकुंडे। आघारावाज्यभागौ कृत्वा। ततो प्रथमं वारुणहोमं कुर्यात्। तत्त्वायामि। येते श
तं। अयाश्चाग्ने। उदुत्तमं। उरुं हि राजा। वरुणस्योत्तंभनं। अग्नेरनीक। दशाकृचं। कृत्वा। ततोग्रहोत्तरत्र

ताञ्जे आज्याकृतीर्जुहुयात् वरुणमंत्रैः। ततो वरुणचरुहोमः। उं वरुणाय स्वाहा। इदं वरुणाय।१॥
यत्नाय स्वाहा। इदं यत्नाय।२ उग्राय स्वाहा। इदं उग्राय।३। भीमाय स्वाहा। इदं भीमाय।४। धाताय।
स्वाहा। इदं धाताय।५। धुनवे स्वाहा। इदं धुनवे।६। शातक्रतवे स्वाहा। इदं शातक्रतवे।७। सुब्रे स्वाहा
इदं सुब्रे।८। स्वर्गाय स्वाहा। इदं स्वर्गाय।९॥ ततो नवग्रहहोमः॥ ॥तदनंतरं विनायक[illegible]रुद्रा
णां तल्लिंगमंत्रैः आज्याचरुतिलहोमः॥ ॥होमं समाप्य उत्तरं स्विष्टकृतं दद्यात्। मंडलदेवताग्रहा
णां षोडशोपचारविधिना पूजयेत्। जलचरजीवान् पूजयेत्। प्रत्येकं नालिकेरादि। छत्रचंदनगं
धपुष्पधूपपत्रस्रगनैवेद्यं च। षडंगरुद्रजपः। भूर्भुवः स्व इत्यादिर्जापमनवाकृतयः। स्वर्णाकृतिं
त्वा। पत्रं पुष्पं फलं वस्त्रं गंधधूपं च चंदनं। सुवस्तु च युग्मेन स्वर्णाकृतिः समाचरेत्।१। ततः रूपंप
रितो दिक्पालसज्जनं। बलिदानं पूर्ववत्। ततः कूर्ममत्स्यमकरादिभ्यो जलजीवेभ्यो बलिदानं।
ततः रूपकं देवप्रतिष्ठाशांतिमंत्रेण जले कुर्यात्। प्रसेचनं। समुद्रज्येष्ठेति मंत्रेण। पंचनद्यः सरस्व
ती। एभिर्मंत्रैर्वेदीकलशचतुष्टयस्य। अन्येषां कुंभानामपि जलं नीत्वा। कुंभमध्येऽभिषेकं कुर्या
त्। ततः प्रार्थना। आपः शिवाश्च वसूश्चैव तर्पयंति पितॄन् सदा। कामदा कामदाचारा राजवंतु मम सर्वदा।
नमस्ते विश्वगोत्रे तु नमो विश्वोरमापते। सांनिध्यं कुरु मे देव समुद्रे तेऽस्मिन् तर्पया।२। ततः स्थलेन गोः
पानव्या। सूर्यविद्यादि मंत्रेण। गावो ममाग्रतः संतु गावो मे संतु पृष्ठतः। इत्यादि सज्जनं। तर्पणं कृत्वा।

गोपुच्छे निःसतर्पणं। विशेषतर्पणं ब्रह्माद्या देवताः सर्वे ऋषयो मुनयस्तथा। दिक्पाला लोकपालाश्च म
हादेवाधिदेवताः। अप्सरो देवपत्न्यश्च मातरश्चंडिकास्तथा।१। दिक्पाला लोकपालाश्च महादेवाधिदेव
ताः। ते सर्वे तृप्तिमायांतु धेनुपुच्छेषु तर्पिताः।२॥ प्रथमः। विश्वेदेवास्तथा देवाः सिद्धाश्चैव मरुद्गणाः। खे
चरी गोपपक्षाश्च नद्यश्च सागरादयः।३॥ पाताले नागपत्न्यश्च नागाश्चैव तु पर्वताः। पिशाचालोगुह्यका
:प्रेतागणा गंधर्वराक्षसाः। पृथिव्यापस्तेजश्च वायुराकाशमेव च। दिव्ये ये चांतरिक्षे च ये च पातालवासि
नः। पशिवः शिवास्तथा विष्णुः सिद्धिर्लक्ष्मीः सरस्वती। तपोधनाश्च भगवान् अव्यक्तः परमेश्वरः। क्षेत्रो
षधिलताः सर्वावृक्षा वनस्पत्याधिदेवताः। कपिलाः शेषनागाश्च नक्षत्रकोनंत एव च।५। अन्ये च वजल
जीवाश्च असंख्यानानेकशः। चतुर्दश यमश्चैव ये चान्ये यमकिंकराः। सर्वे च यक्षराजाश्च पक्षिणः
पशवस्तथा। अन्येपि वनजीवाश्च दिवानिशि महारिणः।९। शांतिदाः सुखदाः तेस्युर्धेनुपुच्छेषु तर्पिताः
।अजा गोमहिषीगावो ये चान्ये पशवस्तथा।१०। स्वेदजाश्चांडजा जीवा उद्भिज्जाश्च जरायुजाः। शांतिदाः
सुखदाश्चैव धेनुपुच्छेषु तर्पिताः।११। तथापसव्येन पितृतर्पणं॥ गोत्रनामोच्चारणं। गुरुतर्पणं। पुरुषा
णां स्त्रीणां च। आब्रह्मस्तंबपर्यंतं देवर्षिपितृमानवाः। सर्पव्याघ्रमृता ये च शृंगिदंष्ट्रिजलाग्निभिः।१२॥
अनुत्वाश्चक्रियाये च अदारा धर्मवर्जिताः। आमगर्भमृता ये च शस्त्रपातमृताश्च ये।१३। असंस्का
रमृता ये च रौरवादिषु गामिनः। तृप्यंतु पितरः सर्वे तथा मातामहादयः। ते सर्वे तृप्तिमायांतु धेनुपुच्छे

पुनर्पिताः ॥१४॥ पितृवंशे मृता ये च मातृवंशे तथैव च। तेषां वै तृप्तिमायांतु धेनुपुच्छेषु तर्पिताः ॥१५॥ तर्प
णं समाप्तं ॥ ॥इमां गां सदक्षिणां ब्राह्मणाय दद्यात्। सर्वत्र वरुणरूपी विष्णुः प्रीयतां। ततो जलोत्स
र्गं वारयेत्। उत्तराभिमुखो भूत्वा सुशोभितानादिकं कृत्वा॥ कृतुदर्भाक्षतान्त्रीत्वा। अश्वत्थादिप्रयोगे।
ण इमं रूपं वरुणदैवतं मृदिष्टकादिसमूहेन बद्धं। अथवा दृषद्बद्धं। अश्वत्थवटादिविचित्रहंसे
रखंजनं चक्रवाकादिविचित्रपक्षिगणैः सेव्यमानं मत्स्यादिभिरुपजीव्यमानं तीर्थोदकपंचग
व्यादिमिश्रितं हेमवरुणादिविचित्रवरुणदेवतं। तत्क्षिप्तं गर्तं गोचागरेण पवित्रमतं गंध
धूपाद्यर्चितं। विचित्रपट्टकूलादिवस्त्रेण परिक्षिप्तं। बलिदानमंत्रैः। बलिसंश्रितं। निक्षिप्तधर्म। की
र्त्तिलक्षणेन यूपसहितं। तदर्थक्रियाकलामेद प्रतिष्ठितं गोमहिष्यादिपायनार्थं यथोक्तप्रयोग
स्नानप्रयोगस्था। तर्पणोदकपानादिजलसाध्यार्थसिध्यर्थं द्विपदचतुष्पदुरगसरिसृपादिचतु
र्विधभूतग्रामसाधारणेनापि। आत्मनः मातृपित्रोः श्रेयसे विष्णोः प्रीत्यर्थं शास्त्रोक्तपुण्यफलावा
प्त्यर्थमहमुत्सृजामि। हृहस्मनिर्वरुणः प्रीयतां। अथवा चतुर्विधभूतग्रामसाधारणेन गतपर्ययक्रमं
चतुर्विधभूतग्राम्यं सूपतुकं तं वह्नि। तेन सहितमहमुत्सृजामि। तद्विष्णोज्वरे। सामान्यं सर्वभूतेषुम
यादत्तमिदं जलं। तत्कलमध्ये नथा। क्षिप्त्वा सृजयेत्कलमातरः। इतिपविलाकुशातिलोदकं जले १०
प्रक्षेपयेत्। पुनर्दर्भाक्षतान्त्रीत्वा। सर्वसत्वेभ्य उत्सृजामि। एतत्कलं पिबंतु सर्वे भूतानि स्नानपाना

वगाहने। सामान्यं सर्वभूतेभ्यो मया दत्तमिदं जलं ॥५॥ देवमनुष्यादयः प्रीयंतां। पुष्पांजलिना जलमातृन्
सृजयेत्। पर्यायबीजो। एतत्कलचरजीवान् नीलावेदीकुंभे चतुष्टयजलं नीलां तं विसर्जनं। रूपं प्रद
क्षिणं कृत्वा। ततो सर्पं निक्षेपयेत्। अंगुलविंशानि सूपाग्रे सूपे कलशाः कार्याः। अश्वत्थोडुंबराश्वे
दखादिरः कंकतस्तथा। शिरः स्कंधोरसो नाभिप्रमाणो ब्राह्मणादिषु। ४ यथालाभं प्रकुर्वीत यूपं
श्रीमनयं सदा। शिरःप्रमाणं कुर्याश्च सर्वेषामप्ययं विधिः। ५ उत्तरे तस्य यूपाः सुस्तडागरूपयोर
पि। वारिमंडलयोर्मध्ये दद्दवानि ललक्षणं। ३। स्नापितं वेदमंत्रैश्च पुष्पिनं चर्चितं तथा॥ ततस्तु स
प्तीकरणं वारुणैर्विष्णुसंश्लिष्टतां सन्तूलिकायां शय्यायां स्थापयेद्देशकोत्तमः। वारिमंडलयो
र्मध्ये प्राग्देशे तोरणान्विते। यूपस्य दक्षिणे पार्श्वे मंडलं परिकल्पयेत्। षट् सर्वायतनारेषा तथै
वोत्तरगायता। व्रीहिभिः परिकर्तव्या पंचविंशतिकोष्ठकाः। मध्यकोष्ठे तु ब्रह्माणं सृजयेद्देशको
त्तमः। सोममुत्तरकोष्ठेषु शिवमीशानगोचरे। इदं तु पूर्वदिग्भागे आग्नेय्यामग्निमेव च। याम्यां य
मं च संपूज्य निरृत्यां निरृतिं तथा। ३। वारुण्यां वरुणं देवं वायव्यां वायुमेव च। सोमवायव्ययो
र्मध्ये वसूनष्टौ तु सृजयेत्। ४। ईशानसोमयोर्मध्ये रुद्रानेकादशस्तथा। महेंद्रेशानयोर्मध्ये आ
दित्या द्वादशस्तथा। ५॥ पुरंदराग्निमध्ये तु अश्विनौ च प्रसृजयेत्। अर्यमासस्तु मध्ये तु सप्तमातृः
प्रसृजयेत्। ६॥ यमनैरृतयोर्मध्ये सृजेद्विधिविनायकौ। नैरृत्वरुणस्थापि नागभूतानि सृजये
त्। वरुणवायव्ययामध्ये यक्षरक्षांसि सृजयेत्। कुबेरब्रह्मणोर्मध्ये सृज्यो नारायणः प्रभुः। कतनुर

० गायत्र्यास्तु दशस्तथा॥ इमं मे गंगे विंशति विष्णुसहिता। रुद्र विंशतिप्रोक्ता ६

दयणोर्मध्ये पितृस्थानं विधीयते। यमब्रह्मांतरे चैव रुद्राणां तु काल एव च। ७। नैरृत ब्रह्मणोर्मध्ये मृ
सुरोगांश्च विन्यसेत्। वरुणब्रह्मणोर्मध्ये सप्त वै मरुतां गणाः॥ १० ब्रह्मवायव्ययोर्मध्ये चित्रगुप्तं प्र
पूजयेत्। ब्रह्मणः पादमूले च मेदिनीं पूजयेद्बुधः॥ ११॥ ऋग्वेदः सर्वतः सौम्यो यजुर्वेदस्तु दक्षिणे। प
श्चिमे सामवेदं च पउत्तरे थर्ववेदकं॥ १२ आग्नेय्यां दिशमाश्रित्य सर्वशास्त्राणि पूजयेत्। सर्वेषा
मत्र चंदनगंधपुष्पधूपदीपपत्रस्रग नैवेद्यं। रूपस्नानमंत्राः। समुद्रज्येष्ठेति मंत्रेण स्नापयेद्दश
कुंभकैः। पूर्वनद्यः सरस्वती दशजिस्तु पुनस्तथा। पंचेंद्रेण दशप्रोक्ता द्वादशभिरेव च। रूपस्य
सेवनं कुर्याद् ईदृग्मंत्रैः समाहितः। १२। शिष्यास्यं तु समादाय रूपं कूपोत्तरे न्यसेत्। युंजते ति समंत्रेण।
पुष्पितं चर्चितं तथा। ३॥ ततो होमसंकल्पः॥ ॥ सुप्रोक्षिताद्यैः प्राशनमार्जनं। आचार्य पुनः एक्षा
। अनेन मंडलदेवतापूजनेन दिक्पालबलिदानेन वास्तुदेवतापूजनहोमेन वेद्यां स्थापित विना
यक ब्रह्म विष्णुदेवतापूजनेन रुद्र वरुण जलजीवादिपूजनेन रूपमूलकृत देवतापूजनेन नवग्र
हपूजनेन कौरिंगे 'नवीनं' कारितकूपेन वरुणप्रतिविधिकृतेन नानुरिक्तश्च कर्म रुतोप्यस्य यत्कृतस्य
ब्राह्मणानां प्रसादात् परिपूर्णमस्तु॥ ॥ श्रुतिस्मृतिपुराणोक्तपुण्यफलावाप्तिरस्तु। विनायकादिदे
वताप्रसादात् कलोऽस्वर्गादि ध्वजारोह रूपमासादिः परिपूर्णोऽस्तु। याज्यगृहे हविर्भवतु। वरुणदेवता ११
प्रीतोऽस्तु। एवमस्तु विप्रैरिति वाच्यः। ततः शांतिकलशैर्यजमानं सपत्नीकं सपरिवारं वेदमंत्रैर्ब्राह्म
णाश्चाभिषिंचेयुः। मंगलमस्तु। आशीश्च। दानसंकल्पः। रूपप्रतिष्ठासिध्यर्थं जलोत्सर्गपरिपूर्णतानिमित्तं

स्थानोक्तदक्षिणां हेमनिःकृतयेवरुणवीरुणीशक्तिप्रीत्यर्थं सपत्नीकब्राह्मण परिधानं। आचार्याय
उपदेशकायजापके भ्यः कलिशो द्वारपालेभ्यो हं संप्रदास्ये। योयस्य विभागः स प्रतिशृह्यतां। अथम
हादानं निष्क्रय द्रव्येण ब्राह्मणभोजनेन च अनिवारितान्नेन वरुणरूपी विष्णुः प्रीयतां। ततस्तु स्थाय
मंडपवास्तुमुख्यमंडलस्थदेवतानवग्रहान् नमस्कृत्वा। रूपं प्रदक्षिणीकृत्य वरुणजलमातृस्थान
मस्कारः। सुकृटबैर्नालिकेराणि मध्ये मोः आनि रूपमंडलजल सर्वदेवता रूपप्रक्षालनं। वैश्वान
रा हि सर्व ग्रहं मंडलवास्तुदेवता मोऽपदेवतानां विसर्जनं। येषु स्थानेषु चावकृता जलाश्रयस्य हेत
वे। गच्छंतु देवताः सर्वाः स्वस्थानं स्थिति हेतवे। सर्वत्र स मस्त्वेति वायव्यमंडपस्थाः तु ये देवा द्वार
तोरणस्थिता। मंडपस्थापिता येच वास्तुवेद्यां प्रतिष्ठिताः। अत्र मंडपरूपेषु नवग्रहमुखाश्च
ये स्याद्यास्थाना नि गच्छंतु पूज्यं तु मम नर्पिताः। इति सर्वेषां विसर्जनं। नराणां क्षमापनं च। यजमा
नः सर्वकामः दद्याद्दानं गजाश्वयोः। वस्त्रदानं च दातव्यं स्ववरितात्रमेव च। एवं कुर्यान्नरः सम्यक्
श्चा चतुर्ष्वाह मुख्यवं। वित्तशाठ्यं न कुर्वीत सर्वं तत्रिष्फलं भवेत्। एवं कृते न संदेहः संपूर्णफलमा
प्नुयात्। रूपस्कंध्री हि हिनिः कृत मंडलरूपमध्ये प्रदक्षिणीकृत्य। मंडपाग्नुपहारानृत्याचार्याय सम १२
र्पयेत्। इति रूपप्रतिष्ठाविधिः समाप्तः॥ ॥ संवत् १७७१ वर्षे वैशाख शुदि ८ गुरौ लिखितं हरिगोविंदे
न॥ ॥